यम् । यस्य सन्निधिमात्रेण देहेन्द्रियमनोधियः । विषयेषु स्वकीयेषु वर्त्तन्ते प्रेरिता इव । अहङ्कारादिदेहान्ता विषयाश्च सुखादयः । वेद्यन्ते घटवद्येन नित्यबोधस्वरूपिणा । एषोऽन्तरात्मा पुरुषः पुराणोनिरन्तराखण्डसुखानुभूतिः । सदैकरूपः प्रतिबोधमात्रो येनेषिता वागसवश्चरन्ति । अत्रैव सत्यात्मनि धीगुहायामव्याकृताकाशउरुप्रकाशः । आकाश उच्चैरविवत् प्रकाशते स्वतेजसा विश्वमिदं प्रकाशयन् । ज्ञाता मनोऽहङ्कृतिविक्रियाणां देहेन्द्रियप्राणकृतक्रियाणाम् । अयोऽग्निवत्तानुवर्त्तमानो न चेष्टते नो विकरोति किञ्चन । न जायते नो म्रियते न वर्द्धते न क्षीयते नो विकरोति नित्यः । विलीयमानेऽपि वपुष्यमुष्मिन् न लीयते कुम्भ इवाम्बरं स्वयम् । प्रकृतिविकृतिभिन्नः शुद्धबोधस्वभावः सदसदिदमशेषं भासयन्निर्विशेषः । विलसति परमात्मा जाग्रदादिष्ववस्थास्वहमहमिति साक्षात् साक्षिरूपेण बुद्धेः । नियमितमनसामुं त्वं स्वमात्मानमात्मन्ययमहमिति साक्षाद्विद्धि बुद्धिप्रसादात् । जनिमरणतरङ्गापारसंसारसिन्धुं प्रतर भव कृतार्थो ब्रह्मरूपेण संस्थः । अत्रानात्मन्यहमिति मतिर्बन्ध एषोऽस्य पुंसः प्राप्तोऽज्ञानाज्जननमरणक्लेशसंपातहेतुः । येनैवायं वपुरिदमसत् सत्यमित्यात्मबुद्ध्या पुष्यत्युक्षत्यवति विषयैस्तन्तुभिः कोशकृत् । अतस्मिंस्तद्बुद्धिः प्रभवति विमूढस्य तमसा विवेकाभावाद्वै स्फुरति भुजगे रज्जुधिषणा । ततोऽनर्थव्रातो निपतति समादातुरधिकस्ततो योऽसद्ग्राहः स हि भवति बन्धः शृणु सखे ! । अखण्डनित्याद्वयबोधशक्त्या स्फुरन्तमात्मानमनन्तवैभवम् । समावृणोत्यावृतिशक्तिरेषा तमोमयी राहुरिवार्कबिम्बम् । तिरोभूते स्वात्मन्यमलतरतेजोवति पुमाननात्मानं मोहादहमिति शरीरं कलयति । ततः कामक्रोधप्रभृतिभिरमुं बन्धनगुणैः परं विक्षेपाख्या रजस उरुशक्तिर्व्यथयति । महामोहग्राहग्रसनगलितात्मावगमनो धियोनानावस्थां स्वयमभिनयंस्तद्गुणतया । अपारे संसारे विषयविषपूरे जलनिधौ निमज्ज्योन्मज्ज्यायं भ्रमति कुमतिः कुत्सितगतिः । भानुप्रभासञ्जनिताभ्रपङ्क्तिर्भानुं तिरोधाय विजृम्भते यथा । आत्मोदिताहङ्कृतिरात्मतत्त्वं तथा तिरोधाय विजृम्भते स्वयम्"।

शरीरमध्ये आत्मध्यानस्थानं स्वरूपञ्च या० स्मृतौ मिताक्षरायाञ्चोक्तम् । "द्वासप्ततिसहस्राणि हृदयादभिनिःसृताः । हिताहिता नाम नाड्यस्तासां मध्ये शशिप्रभम् । मण्डलन्तस्य मध्यस्थ आत्मा दीपइवाचलः । सज्ञेयस्तं विदित्वेह पुनराजायते न तु" या० । "हृदयप्रदेशादभिनिःसृताः कदम्बकुसुमकेशरवत्सर्व्वतो निर्गता हिताहितकरत्वेन हिताहितेति संज्ञा द्वासप्ततिसहस्राणि नाड्यो भवन्ति । अपरास्तिस्रोनाड्यस्तासामिडापिङ्गलाख्ये द्वे नाड्यौ सव्यदक्षिणपार्श्वगते हृदि विपर्य्यस्ते नासाविवरसम्बद्धे प्राणापानायतने । सुषुम्णाख्या पुनस्तृतीया दण्डवन्मध्ये ब्रह्मरन्ध्रविनिर्याता । तासां नाडीनां मध्ये मण्डलञ्चन्द्रप्रभम् । तस्मिन्नात्मा निवातस्थदीपइवाचलः प्रकाशमान आस्ते । सएवम्भूतो ज्ञातव्यः । यतस्तत्साक्षात्करणादिह संसारे न पुनः संसरत्यमृतत्वम्प्राप्नोति" मिता० ।

आत्मशब्दनिर्वचनञ्च वेदान्तमुक्तावल्याम् /"यदाप्नोति यदादत्ते यच्चात्ति विषयान् बहून् । यच्चास्य सन्ततोभावस्तस्मादात्मेति कथ्यते" अन्यत्र च "प्रत्यग्रूपः पराग्रूपात् व्यावृत्तोऽनुभवात्मकः । प्रथते यः स आत्मेति प्राहुरात्मविदोजनाः इति"स च पञ्चधा । "भूतात्मा चेन्द्रियात्मा च प्रत्यगात्मा तथा भवान् । आत्मा च परमात्मा च त्वमेकः पञ्चधा मत" इत्येकस्यैवात्मनो भूतादिषु अधिष्ठानत्वेनावस्थितेः पञ्चविधत्वम् । "त्यज्यमानेऽपि न त्यक्तः प्राप्यमाणेऽपि नाप्यते । आगमापायसाक्षी यः स आत्मानुभवात्मक" इति तत्र देहे "भर्त्तृषूपसखि निक्षिपतीनामात्मनोमधुमदोद्यमितानाम्" किरा० "आत्मनोदेहान्" मल्लि० 'प्रभाविनं भाविनमन्तमात्मनः" माघः । आत्मनोनित्यत्वेन देहस्यैवान्तकत्वमिह विवक्षितम् तदवच्छिन्नचैतनस्यात्मशब्दार्थत्वेऽपि विशेष्टे नाशान्वयासम्भवात् विशेषणे तदन्वयः । एवं "व्यापादयेद्य आत्मानमित्यादौ" 'ये केचात्महनोजना" इत्यादावपि "स्थितः सर्व्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना" रघु० । "आत्मना शरीरेण" मल्लि० "अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्" गीता । यत्ने "कर्म्मात्मा त्वपरोयोऽसौ बन्धमोक्षैः स युज्यते" इति कर्म्मणि आत्मा यत्नोयस्येत्यर्थः । भूतात्मेत्यादौ आत्मशब्दः गौणः आत्मोपकरणत्वात् आत्मजन्यत्वाद्वा "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" इत्यादिश्रुत्या भूतानामात्मन उत्पत्तिप्रतिपादनात् । स्वभावे, बुद्धौ च "तमात्मसम्पन्नमनिन्दितात्मा" रघुः । "अनिन्दितात्मा अगर्हितस्वभावः आत्मसम्पन्नं बुद्धिसम्पन्नम्" मल्लि० । १२ देहावच्छिन्ने चैतन्ये च 'आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः" स्मृतिः । अन्तःकरणे, 'आत्मानमात्मना वेत्सि" कुमा० । "तन्मनोऽकुरुतात्मन्वी स्याम्"